# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा नवम्बर/दिसम्बर् - २०१६

कक्षा- आचार्यः - २ (Sem – 3) **प्रश्नपत्रम् - २** गुणाः - ७०

विषयः - वेदः **कोड - CC – 5.3.7** समयः- ११:०० तः २:००

दिनाङ्कः – २५-११-२०१६ सन्दर्भग्रन्थः - माध्यन्दिनसंहिता

---

प्रथमान्वितिः (युनिट - १)

**प्रश्नः १ अधोलिखितयोरन्यतर एव मन्त्रः व्याख्यायताम् ।** (४)

(क) पुनाति ते परिस्रुतं सोमं सूर्यस्य दुहिता।
वारेण शश्वता तना।

(ख) पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत्।
अग्ने क्रत्वा क्रतूँ रनु।।

**प्रश्नः २ अधोलिखितयोरप्येक एव प्रश्नः समाधेयः।** (१२)

(क) माध्यन्दिनसंहितायाः एकोनविंशतितमाध्याये प्राप्तान् सोमसंबद्धविचारान् उपस्थापयत ।

(ख) एकोनविंशतितमाध्यायस्य (माध्यन्दिनसंहितायाः) वैशिष्ट्यमुपपादयत ।

**प्रश्नः ३ केशाञ्चित् चतुणामेव शब्दानां अर्थः भाष्यदिशा लेखनीयः।** (४)

(क)शुक्रम् (ख) अतीतृपन्त (ग) कर्कन्धूनि (घ)कुवलम्
(ङ)स्वर्काः (च)परिस्रुत्

द्वितीयान्वितिः (युनिट - २)

**प्रश्नः ४ अधोलिकितयोरप्यन्यतरस्य मन्त्रस्य पठितभाष्यानुसारं व्याख्यां निरूपयत।** (४)

(क) पृष्टीर्मे राष्ट्रमुदरमंसौ ग्रीवाश्च श्रोणी ।
ऊरू अरत्नी जानुनीविशो मेङ्गानि सर्वतः॥

(ख) यत्र ब्रह्म च क्षत्रं च सम्यञ्चौ चरतः सह। तं लोकं पुण्यं प्रज्ञेषं यत्र देवाः सहाग्निना ॥

**प्रश्नः ५ अधोलिखतयोरन्यतरस्योत्तरं लिखत।** (१२)

(१)माध्यन्दिनसंहितायाः विंशतितमाध्याये मानवीयप्रमादजनितापराध-प्रकाराणां वर्णनं विधाय तन्निवारणोपायान् अपि लिखत ।

(२)माध्यन्दिनसंहितायाः विंशतितमाध्याये वैदिकदेवसंख्याविषये यथाज्ञानं विलिख्य तदध्यायगतान्येषामपि देवानां नामानि(यथासाध्यम्) लिखत ।

**प्रश्नः ६ केशाञ्चित् चतुणामेव शब्दानां अर्थः भाष्यदिशा लेखनीयः।** (४)

(क)वृत्रहन्तमम्　(ख)सुत्राम्णे　(ग)श्रोत्रपाः　(घ)देवत्रा
(ङ)वज्रबाहुः　(च)मिमाना

तृतीयान्वितिः (युनिट - ३)

**प्रश्नः ७　अधस्तनयोरप्यन्यतरस्य प्रश्नस्योत्तरं लिखत।** **(८)**
(क)एकविंशतितमाध्यायस्य(माध्यन्दिनसंहितायाः) विषयसारांशं लिखत।
(ख)माध्यन्दिनसंहितायाः एकविंशतितमाध्याये प्रासंगिकरूपेणागतानां मन्त्रगतदेवतानां विषये यथाज्ञानं लिखत।

**प्रश्नः ८　अधोलिखितयोरन्यतरस्य मन्त्रस्य यथाभाष्यं व्याख्या विधीयताम्।** **(४)**
(क)आनोमित्रावरुणा घृतैर्गव्यूतिमुक्षतम्। मध्वा रजांसि सुक्रतू॥
(ख) तिस्र इडा सरस्वती भारती मरुतो विशः।
विराट्छन्द इहेन्द्रियं धेनुर्गौर्न वयो दधुः॥

**प्रश्नः ९　अधोलिखितेषु त्रयाणां शब्दानां पठितभाष्यानुसारम् अर्थं लिखत।** **(३)**
(क) तुर्यवाड्　(ख) अद्भुतः　(ग)वशा　(घ)मासरम्　(ङ) होता

चतुर्थान्वितिः (युनिट – ४)

**प्रश्नः १०　अधोलिखितेषु मन्त्रेषु द्वयोः मन्त्रयोः पदपाठं लिखत।** **(८)**
(क)तस्माद्यज्ञात्सर्वहुत ऋचःसामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत॥
(ख)ततोविराडजायत विराजो अधिपूरुषः।
स जातो अत्यरिच्यत पश्चाद्भूमिमथोपुरः॥
(ग)एतावानस्यमहिमातो ज्यायाँश्च पूरुषः।
पादोस्य विश्वाभूतानि त्रिपादस्यामृतं दिवि॥

**प्रश्नः ११　अधो निर्दिष्टयोरप्येकस्यैव मन्त्रस्य (पूर्तिं विधाय) पदपाठो विधीयताम्।** **(४)**
(क) चन्द्रमा मनसो जातश्चक्षोः------- ॥
(ख)यत्पुरुषेण हविषा------------- ॥

**प्रश्नः १२　निम्नस्थेषु शब्देषु त्रय एव शब्दाः यथाभाष्यं विश्लेषणीयाः।** **(३)**
(क) भाव्यम्　(ख) अतिरोहति　(ग) उभयादतः　(घ) विराट्　(ङ) महिमानः

***********